# Trailokyamohana Shrirama Kavacham

# ત્રૈલોક્યમોહન શ્રીરામકવચં

## Document Information

Text title : Trailokyamohana Shrirama kavacham

File name : trailokyamohanashrIrAmakavacham.itx

Category : raama, kavacha

Location : doc_raama

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : The main text is similar to trailokyamohanavajrapanjararAmakavacham

Latest update : December 30, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2023

*sanskritdocuments.org*

# ત્રૈલોક્યમોહન શ્રીરામકવચં

વિનિયોગઃ -
ૐ અસ્ય ત્રૈલોક્યમોહનશ્રીરામકવચસ્ય બ્રહ્મા ઋષિરનુષ્ટુપ્ છન્દઃ ।
શ્રીરામચન્દ્રો દેવતા । અનન્તોઽગ્ન્યાસનઃ । સેન્દુરિતિબીજમ્ ।
ૐ શ્રીરામ એવ પરં બ્રહ્મ ઇતિ શક્તિઃ ।
ૐ મધુરપ્રસન્નવદનાયેતિ હૃદયમ્ । ૐ ક્લીં રામભદ્રાયેતિ કીલકમ્ ।
ૐ હૂઁ જાનકીવલ્લભાયેત્યસ્ત્રમ્ । ૐ અમિતતેજસે બલાયેતિ કવચમ્ ।
ૐ શ્રીં રાં રામાયેતિ પરમો મન્ત્રઃ ।
મમ સકલવિધિશ્રીસીતારામપદારવિન્દાનુરાગાર્થે (જપે) પાઠે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ -
ૐ બ્રહ્મા ઋષયે નમઃ શિરસિ ।
ૐ અનુષ્ટુપ્ છન્દસે નમો મુખે ।
ૐ શ્રીરામચન્દ્રો દેવતાયૈ નમો હૃદયે ।
ૐ અનન્તોઽગ્ન્યાસનઃ સેન્દુરિતિ બીજાય નમો નાભ્યામ્ ।
ૐ મધુરપ્રસન્નવદનાયેતિ હૃદયાય નમ ઉદરે ।
ૐ ક્લીં રામભદ્રાયેતિ કીલકાય નમઃ કટ્યામ્ ।
ૐ હૂઁ જાનકીવલ્લભાયેત્યસ્ત્રાય નમો ગુહ્યે ।
ૐ અમિતતેજસે બલાયેતિ કવચાય નમો જઙ્ઘયોઃ ।
ૐ શ્રીં રાં રામાયેતિ પરમમન્ત્રાય નમઃ પુનઃ શિરસિ ।
શ્રીસીતારામપદારવિન્દાનુરાગાર્થે પાઠે વિનિયોગાય (જપે) સર્વાઙ્ગે ॥

કરન્યાસઃ -
ૐ રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ રાં તર્જનીભ્યાં નમઃ ।
ૐ માં મધ્યામાભ્યાં નમઃ । ૐ યં યમનામિકાભ્યાં નમઃ ।
ૐ નં કનિષ્ઠિકાભ્યાં નમઃ । ૐ મઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

હૃદયાદિન્યાસઃ -

ૐ રાં હૃદયાય નમઃ । ૐ રાં શિરસે સ્વાહા ।
ૐ માં શિખાયૈ વષટ્ ।
ૐ યં કવચાય હૂં। ૐ નં નેત્રાભ્યાં વૌષટ્ । ૐ મઃ અસ્ત્રાય ફટ્ ।
ૐ હીં ક્લીં શ્રીં રાં ક્ષ્રૌં ક્રૌં ઐઁ હુઁ ફટ્ સ્વાહા ઇતિ દિગ્બન્ધનં કુર્યાત્ ॥

ધ્યાનમ્ -
વૈદેહી સહિતં સુરદ્રુમતલે હૈ મે મહામણ્ડપે
મધ્યે પુષ્પકમાસને મણિમયે વીરાસને સંસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનીન્દ્રૈઃ પરં
વ્યાખ્યાતં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥

પાર્વત્યુવાચ ।
ભગવન્ સર્વદેવેશ સર્વ દેવનમસ્કૃત ।
સર્વં મે કથિતં દેવ રામમન્ત્રો વિશેષતઃ ॥ ૧॥

ત્રૈલોક્યમોહનં નામ કવચં પૂર્વસૂચિતમ્ ।
કથયસ્વ મહાદેવ યદ્યહં તવ વલ્લભા ॥ ૨॥

ઈશ્વર ઉવાચ ।
શ્રૃણુ વક્ષ્યામિ દેવેશિ કવચં પરમાદ્ભુતમ્ ।
અત્યન્તં ગોપનં ગુહ્યં બ્રહ્મમન્ત્રૌઘવિગ્રહમ્ ॥ ૩॥

ૐ પ્રણવો મે શિરઃ પાતુ તારકો બ્રહ્મરૂપકઃ ।
અનન્તોઽગ્ન્યાસનઃ સેન્દુર્નાસામેકાક્ષરોઽવતુ ॥ ૧॥

ૐ રાં રામાય નમઃ પાતુ ભાદ્વૂર્ણો ભુક્તિમુક્તિદઃ ।
ભાલં પાયાન્નેત્રયુગ્મં રામો દ્વયક્ષરસંજ્ઞકઃ ॥ ૨॥

ૐ ક્લીં પાયાચ્છ્રોત્રયુગ્મં હ્યકાક્ષરવિમોહનઃ ।
ૐ હ્રીં શ્રીં ક્લીં નમો રામાય મુખં મે પરિરક્ષતુ ॥ ૩॥

ૐ નમઃ શ્રી રાઘવેન્દ્રાય કણ્ઠં પાતુ મનુસ્ત્વયમ્ ।
ૐ ક્લીં શ્રીં રાં રામાય નમઃ સ્કન્ધૌ પાતુ ખરાન્તકઃ ॥ ૪॥

ૐ નમો રાં રામચન્દ્રાય મન્ત્રઃ પાતુ ભુજદ્વયમ્ ।
ૐ શ્રીમદ્રામભદ્રાય કરૌ પાતુ મનુસ્વરાટ્ ॥ ૫॥

ૐ શ્રીરામચન્દ્રાય રક્ષોઘ્નાય નમો મન્ત્રોઽયં દ્વાદશાક્ષરઃ ।
હૃદયં મે સદા પાતુ રઘુવંશસમુદ્ભવઃ ॥ ૬॥

ૐ ક્લીં રામભદ્રાય નમઃ પાતુ નાભિં દુષ્ટાન્તકઃ પ્રભુઃ ।
ૐ નમઃ શ્રીરામચન્દ્રાય કટિમષ્ટાક્ષરોઽવતુ ॥ ૭॥

સક્થિની સતતં પાતુ રાક્ષસેન્દ્ર વિમર્દ કઃ ।
ૐ હ્રીં રામચન્દ્રાય નમઃ પાતુ મે ઊરૂયુગ્મકમ્ ॥ ૮॥

ૐ પ્રણવો રામચન્દ્રાય નમો વસ્વક્ષરઃ સ્વરાટ્ ।
જાનુની મે સદા પાતુ રક્ષઃકુલવિનાશકઃ ॥ ૯॥

ૐ પ્રણવો રામભદ્રાય નમોઽષ્ટાક્ષરસ્વયમ્ ।
પાદયુગ્મં સદા પાતુ વાનરેન્દ્રશ્રિયઃ પ્રદઃ ॥ ૧૦॥

ૐ નમો રામભદ્રાય સર્વાઙ્ગ પાતુ સર્વતઃ ।
ૐ હ્રીં સીતાપતયે નમઃ પ્રાચ્યાં માં સર્વદાવતુ ॥ ૧૧॥

ૐ હીં જાનકીવલ્લભાય દક્ષિણે પાતુ સર્વદા ।
ૐ ક્લીં જાનકીશાય નમો વારુણ્યાં માં સદાવતુ ॥ ૧૨॥

ૐ શ્રીં રઘુનાથાય નમઃ કૌબેર્યા દિશિ રક્ષતુ ।
ૐ હ્રીં જાનકીવલ્લભાય આગ્નેયાં માં સદાવતુ ॥ ૧૩॥

ૐ હ્રીં ક્લીં ભરતાગ્રજાય પાતુ માં નૈરૃત્યાં દિશિ ।
ૐ શ્રીં જાનકીવલ્લભાય વાયવ્યાં માં સદાવતુ ॥ ૧૪॥

ૐ શ્રીં હ્રીં ક્લીં દાશરથાય ચેશાન્યાં રક્ષ માં સદા ।
ૐ નમો ભગવતે રઘુનન્દનાય રક્ષોઘ્નવિષદાય
મધુરપ્રસન્નવદનાય અમિતતેજસે બલાય રામાય વિષ્ણવે નમઃ ॥ ૧૫॥

પ્રણવાદિનમોઽન્તોઽયં માલામન્ત્ર ઉદીરિતઃ ।
રાજ્યસ્થાને સદા પાતુ રઘુવંશસમુદ્ભવઃ ॥ ૧૬॥

ૐ નમો ભગવતે શ્રીરામાય મહાપુરુષાય નમઃ ।
અષ્ટાદશાક્ષરો મન્ત્રો મામેવ સર્વદાવતુ ॥ ૧૭॥

ધ્યાયેદ્ધૃત્પુણ્ડરીકાક્ષં પરઞ્જ્યોતિઃ પરાત્પરમ્ ।
રામમેવ પરં બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ॥ ૧૮॥

ઇતિ ધ્યાત્વા જપેન્મન્ત્રં ભુક્તિમુક્તિપ્રદાયકમ્ ।

ૐ દાશરથાય વિદ્મહે સીતાપ્રિયાય ધીમહિ ।

તન્નો રામઃ પ્રચોદયાત્ ॥ ૧૯॥

ઇત્યેવં રામગાયત્રી ભક્તિવીર્યપ્રવર્ધિની ।
ગાયત્રી જપમાત્રેણ ભુક્તિમુક્તિપ્રદાયની ॥ ૨૦॥

ઇતિ તે કથિતં દેવિ ! સર્વમન્ત્રૌઘવિગ્રહમ્ ।
ત્રૈલોક્યમોહનં નામ કવચં બ્રહ્મરૂપકમ્ ॥ ૨૧॥

પ્રાતઃકાલે પઠેદ્યસ્તુ સોઽભીષ્ટફલમાપ્નુયાત્ ।
સાયમ્મધ્યાહ્નકાલેઽપિ જપાત્સિદ્ધિમનૂત્તમામ્ ॥ ૨૨॥

પૂજાકાલે પઠેદ્યસ્તુ કવચં સાધકોત્તમઃ ।
કીર્તિઃ શ્રીઃ કાન્તિમેધાયુર્જપતો ભવતિ ધ્રુવમ્ ॥ ૨૩॥

રામમન્ત્રમયં બ્રહ્મકવચં મન્મુખોદિતમ્ ।
ગુરુમભ્યર્ચ્ય વિધિવત્કવચં યઃ પઠેત્તતઃ ॥ ૨૪॥

દ્વિઃ સકૃદ્વા જપેદ્યસ્તુ સોપિ પુણ્યવતાં વરઃ ।
દેવમભ્યર્ચ્ય વિધિવત્પુરશ્ચર્યાં સમારભેત્ ॥ ૨૫॥

અષ્ટોત્તરશતં જપ્ત્વા દશાંશં હવનાદિકમ્ ।
તતસ્તુ સિદ્ધકવચં સર્વકાર્યાણિ સાધયેત્ ॥ ૨૬॥

મન્ત્રસિદ્ધિર્ભવેત્તસ્ય પુરશ્ચર્યાવિધાનતઃ ।
ગદ્યપદ્યમયી વાણીં તસ્ય વક્ત્રાત્પ્રવર્તતે ॥ ૨૭॥

વક્ત્રે તસ્ય વસેદ્વાણી કમલા નિશ્ચલા ગૃહે ।
પુષ્પાઞ્જલ્યષ્ટકં દત્ત્વા મૂલેનૈવ પઠેત્સકૃત્ ॥ ૨૮॥

અપિ વર્ષસહસ્રાણાં પૂજાફલમવાપ્નુયાત્ ।
વિલિખ્ય ભૂર્જપત્રે ચ સ્વર્ણસ્થં ધારયેદ્યદિ ॥ ૨૯॥

કણ્ઠે વા દક્ષિણે વાહૌ સ કુર્યાદ્દાસવજ્જગત્ ।
ત્રૈલોક્યં ક્ષોભયેદ્દેવિ ત્રૈલોક્યવિજયી ભવેત્ ॥ ૩૦॥

તદ્ગાત્રં પ્રાપ્ય શસ્ત્રાણિ બ્રહ્માસ્ત્રાદીનિ યાનિ ચ ।
માલ્યાનિ કુસુમાનીવ સુખદાનિ ભવન્તિ હિ ॥ ૩૧॥

સ્પર્ધામુધૂય ભવને લક્ષ્મી વાણી મુખે વસેત્ ।
ઇદં કવચમજ્ઞાત્વા યો જપેદ્રામમન્ત્રકમ્ ॥ ૩૨॥

શતલક્ષં પ્રજપ્તોઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ।
સ શસ્ત્રઘાતમાપ્નોતિ સોઽચિરાન્મૃત્યુમાપ્નુયાત્ ॥ ૩૩॥

સમ્યગ્ જ્ઞાત્વા તુ કવચં મન્ત્રઃ સ્યાચ્છીઘ્રસિદ્ધિદઃ ।
એકાવૃત્ત્યા લભેલ્લક્ષ્મીં દ્વિરાવૃત્ત્યા જગદ્વશી ॥ ૩૪॥

ત્રિરાવૃત્ત્યા પઠેન્નિત્યં સર્વાર્થસિદ્ધિદં ભવેત્ ।
ચતુર્વારં પઠેન્નિત્યં પુત્રપૌત્રાદિકં ભવેત્ ॥ ૩૫॥

પઞ્ચવારં પઠેન્નિત્યં દિવ્યકાયો ભવેન્નરઃ ।
ષડ્વારં તુ પઠેન્નિત્યં સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૩૬॥

સપ્તાવૃત્ત્યા સહોમેન વાચાસિદ્ધિઃ પ્રજાયતે ।

ઇતિ શ્રીરુદ્રયામલતન્ત્રે ઈશ્વરપાર્વતીસંવાદે
ત્રૈલોક્યમોહનં નામ શ્રીરામકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Mrityunjay Pandey

---

*Trailokyamohana Shrirama Kavacham*

pdf was typeset on December 30, 2023

Please send corrections to *sanskrit@cheerful.com*